# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (५)

०८.०८.२०११

# पुनरावर्तनम्

- हकारान्ताः पुंलिङ्गाः
- ‘तुरासाह्’ शब्दः
- पदान्ते हस्य ढत्वे, जस्य च जश्त्वे कृते ‘सहेः साडः सः’ इति मूर्धन्यादेशः।
- तुराषाड्, तुराषाड्भ्याम् ।

- वकारान्ताः पुंलिङ्गाः
- ‘सुदिव्’ शब्दः
- सौ ‘दिव औत्’ इति औकारादेशः । सुद्यौः ।
- पदान्ते ‘दिव उत्’ इति उकारादेशः । सुद्युभ्याम्, सुद्युभिः ।

# पुनरावर्तनम्

- रेफान्ताः पुंलिङ्गाः ।
- ‘चतुर्’ शब्दः, नित्यं बहुवचनान्तः ।
- जसि ‘चतुरनडुहोरामुदात्तः’ इति आम् । चत्वारः ।
- आमि ‘षट्चतुर्भ्यश्च’ इति नुट् । चतुर्णाम् ।
- गौणत्वे नुट् न । प्रियचतुराम् ।

- लकारान्ताः पुंलिङ्गाः ।
- ‘कमल्’ शब्दः ।
- प्रक्रियायां कोऽपि विशेषो न ।

- संक्रन्दनो दुश्च्यवनः तुराषाण्मेघवाहनः (अमरः)
- तुराषाड् - हकारान्तः पुंलिङ्गः ‘तुरासाह्’ शब्दः, प्रथमाविभक्तिः, एकवचनम् ।
- सुलोपः, ‘हो ढः’, जश्त्वम्, ‘सहेः साडः सः’ इति षत्वम् ।

- महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाताः येषां लोक इमाः प्रजाः ॥ (भगवद्गीता - १०.६)
- चत्वारः - रेफान्तः पुंलिङ्गः ‘चतुर्’ शब्दः, प्रथमाविभक्तिः, बहुवचनम् ।
- जस्, ‘चतुरनडुहोः...’ इति आमागमः, रुत्वविसर्गौ ।

- यथा चतुर्भिः कनकं परीक्ष्यते निघर्षण-च्छेदन-ताप-ताडनैः ।
तथा चतुर्भिः पुरुषः परीक्ष्यते कुलेन शीलेन गुणेन कर्मणा ॥
- रेफान्तः नपुंसकलिङ्गः 'चतुर्' शब्दः, तृतीयाविभक्तिः, बहुवचनम् ।
- भिस्-प्रत्ययः, रुत्वविसर्गौ ।

- धर्मेण चतुरो वर्णान् पालयन् क्लेशमाप्नुहि (श्रीमद्रामायणम् - २.१०६.२१)
- रेफान्तः पुंलिङ्गः 'चतुर्' शब्दः, द्वितीयाविभक्तिः, बहुवचनम् ।
- शस्-प्रत्ययः, रुत्वविसर्गौ ।

- कर्ता कारयिता चैव प्रेरकश्चानुमोदकः ।
सुकृते दुष्कृते चैव चत्वारः समभागिनः ॥
- चत्वारः - रेफान्तः पुंलिङ्गः 'चतुर्' शब्दः, प्रथमाविभक्तिः, बहुवचनम् ।
- जस्, 'चतुरनडुहोः...' इति आमागमः, रुत्वविसर्गौ ।

- चतुर्णाम् आश्रमाणां हि गार्हस्थ्यं श्रेष्ठमाश्रमम् (श्रीमद्रामायणम् २.१०६.२२)
- चतुर्णाम् - रेफान्तः पुंलिङ्गः 'चतुर्' शब्दः, षष्ठीविभक्तिः, बहुवचनम् ।
- आम्, 'षट्चतुर्भ्यश्च' इति नुट्, 'रषाभ्याम्...' इति णत्वम्, 'अचो रहाभ्याम्..' इति द्वित्वम् ।

- विश्ववाह् ( शस्) अस्
- विश्व ऊ आह् अस् ('वाह ऊठ्')
- विश्व ऊह् अस् ('सम्प्रसारणाच्च')
- विश्वौहस् ('एत्येधत्यूठ्सु')
- विश्वौहर्
- विश्वौहः

- विश्ववाह् (ण्वि) अस्
- विश्व उ अह् (ण्वि) अस् (‘वाहः’ इति शसं निमित्तीकृत्य सम्प्रसारणम्)
- विश्व उह् (ण्वि) अस् (‘सम्प्रसारणाच्च’)
- विश्व ओह् (ण्वि) अस् (‘पुगन्तलघूपधस्य च’ इति ण्विप्रत्ययनिमित्तकः गुणः)
- विश्वौहस् (‘वृद्धिरेचि’)
- विश्वौहः

बहिर्भूतनिमित्तकत्वात्
बहिरङ्गम्

अन्तर्भूतनिमित्तकत्वात्
अन्तरङ्गम्

# मकारान्ताः पुंलिङ्गाः

- प्र + शमु उपशमे
- प्र शम् (क्विप्) व् ('क्विप् च' )
- प्र शाम् व् ('अनुनासिकस्य क्विझलोः क्ङिति' - ६.४.१५ - इति दीर्घः)
- प्रशाम् ('वेरपृक्तस्य' - ६.१.६७ - इति वलोपः)

- प्रशाम् (सुँ) स्
- प्रशाम् ('हल्ङ्याब्भ्यः...' - ६.१.६८ - इति सुलोपः)

# ३४१. मो नो धातोः (८.२.६४)

- पदत्रयम् । मः, नः, धातोः ।
- ‘पदस्य’ (८.१.१६) इत्यधिक्रियते । ‘स्कोः संयोगाद्योरन्ते च’ - ८.२.२९ - इत्यतः ‘अन्ते’ इत्यनुवर्तते ।
- मान्तस्य धातोः नः स्यात् पदान्ते ।

- प्रशाम्
- प्रशान् (‘मो नो धातोः’ इति मस्य नः)
- नस्य असिद्धत्वात् नलोपो न (‘नलोपः प्रातिपदिकान्तस्य’ - ८.२.७) ।
- प्रशाम्यति इति प्रशान्, प्रशामौ, प्रशामः ।
- प्रशान्भ्याम् इत्यादि ।

- प्रशाम्  सु
- प्रशान्  सु  (‘मो नो धातोः’ - ८.२.६४ - इति मस्य नः)
- प्रशान् ध् सु  (‘नश्च’ - ८.३.३० - इति वा धुडागमः)
- प्रशान् त् सु  (‘खरि च’ - ८.४.५५ - इति चर्त्वम्)
- प्रशान्त्सु ।
- धुडभावे प्रशान्सु ।

# मकारान्तः पुँल्लिङ्गः प्रशाम्-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | प्रशान् | प्रशामौ | प्रशामः |
| स | हे प्रशान् | हे प्रशामौ | हे प्रशामः |
| द्वितीयाविभक्तिः | प्रशामम् | प्रशामौ | प्रशामः |
| तृतीयाविभक्तिः | प्रशामा | प्रशान्भ्याम् | प्रशान्भिः |
| चतुर्थीविभक्तिः | प्रशामे | प्रशान्भ्याम् | प्रशान्भ्यः |
| पञ्चमीविभक्तिः | प्रशामः | प्रशान्भ्याम् | प्रशान्भ्यः |
| षष्ठीविभक्तिः | प्रशामः | प्रशामोः | प्रशामाम् |
| सप्तमीविभक्तिः | प्रशामि | | प्रशान्त्सु/प्रशान्सु |

पदान्ते 'मो नो धातोः' इति मस्य नकारादेशः

सुपि नत्वे कृते 'नश्च' इति वा धुट्

- मकारान्तः पुंलिङ्गः ‘किम्’ शब्दः ।
- ‘सर्वादीनि सर्वनामानि’ इति सर्वनामसंज्ञा ।
- सर्व, विश्व.... एक, द्वि, युष्मद्, अस्मद्, भवतु, किम् ।
- किम् (सुँ) स्

# ३४२. किमः कः (७.२.१०३)

- पदद्वयम् । किमः, कः ।
- ‘अष्टन आ विभक्तौ’ (७.२.८४) इत्यतः ‘विभक्तौ’ इति अनुवर्तते ।
- किमः कः स्याद् विभक्तौ ।
- अकच्-सहितस्यापि अयम् आदेशः ।
- ‘अव्ययसर्वनाम्नामकच् प्राक्टेः’ । सर्वः-सर्वकः ।
- किम् - ककिम् ।
- अनेकाल्त्वात् सर्वादेशः ।

- किम् स्
- क स् (‘किमः कः’ - ७.२.१०३)
- क र् (‘ससजुषो रुः’ - ८.२.६६)
- कः (‘खरवसानयोर्विसर्जनीयः’ - ८.३.१५)

- किम् औ
- क औ (‘किमः कः’ - ७.२.१०३)
- कौ (‘वृद्धिरेचि’ - ६.१.८८)

- कः, कौ, के ।
- कम्, कौ, कान् ।
- इत्यादि सर्ववत् ।
- सर्वनामनिमित्तानि कार्याणि -
- जसि ‘जसः शी’ इति शी-आदेशः । के ।
- ङेः ‘सर्वनाम्नः स्मै’ - इति स्मै । कस्मै ।
- ङसौ ‘ङसिङ्योः स्मात्स्मिनौ’ इति स्मात् । कस्मात् ।
- आमि ‘आमि सर्वनाम्नः सुट्’ इति सुट् । केषाम् ।
- ङौ ‘ङसिङ्योः स्मात्स्मिनौ’ इति स्मिन् । कस्मिन् ।

# मकारान्तः पुँल्लिङ्गः किम्-शब्दः

सर्वासु विभक्तिषु 'किमः कः' इति कादेशः । आदेशे कृते अदन्त-सर्वनामवद् रूपाणि ।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमाविभक्तिः | कः | कौ | के |
| द्वितीयाविभक्तिः | कम् | कौ | कान् |
| तृतीयाविभक्तिः | केन | काभ्याम् | कैः |
| चतुर्थीविभक्तिः | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमीविभक्तिः | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठीविभक्तिः | कस्य | कयोः | केषाम् |
| सप्तमीविभक्तिः | कस्मिन् | कयोः | केषु |